# Shri Chidambaresha Stuti

# શ્રીચિદમ્બરેશસ્તુતિઃ

## Document Information

Text title : Shri Chidambaresha Stuti 02 36

File name : chidambareshastutiH.itx

Category : shiva, stuti

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From stotrArNavaH 02-36

Latest update : July 25, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 25, 2021

*sanskritdocuments.org*

# શ્રીચિદમ્બરેશસ્તુતિઃ

કલ્યાણમૂર્તિં કનકાદ્રિચાપં
　કાન્તાસમાક્રાન્તનિજાર્ધદેહમ્ ।
કાલાન્તકં કામરિપું પુરારિં
　ચિદમ્બરેશં હૃદિ ભાવયામિ ॥ ૧॥

વિશ્વાધિકં વિષ્ણુમુખૈરુપાસ્યં
　ત્રિલોચનં ચન્દ્રકલાવતંસમ્ ।
ઉમાપતિં પાપહરં પ્રશાન્તં
　ચિદમ્બરેશં હૃદિ ભાવયામિ ॥ ૨॥

વિશ્વેશ્વરં નિત્યમનન્તરૂપં
　બાલેન્દુચૂડં સુરવન્દ્યપાદમ્ ।
પતિં પશૂનાં હૃદિ સન્નિવિષ્ટં
　ચિદમ્બરેશં હૃદિ ભાવયામિ ॥ ૩॥

વિશાલનેત્રં પરિપૂર્ણગાત્રં
　ગૌરીકલત્રં સુરવૈરિશત્રુમ્ ।
કુબેરમિત્રં જગદેકપાત્રં
　ચિદમ્બરેશં હૃદિ ભાવયામિ ॥ ૪॥

કૈલાસવાસં જગતામધીશં
　મુરારિમિત્રં પુરુહૂતવન્દ્યમ્ ।
મહેશમૂર્તિં સુરસેવ્યમાનં
　ચિદમ્બરેશં હૃદિ ભાવયામિ ॥ ૫॥

કર્પૂરગાત્રં કમનીયપાત્રં
　કંસારિમિત્રં કમલેન્દુવક્ત્રમ્ ।
કન્દર્પશત્રું કમલેશમિત્રં
　ચિદમ્બરેશં હૃદિ ભાવયામિ ॥ ૬॥

ત્વમેવ બન્ધુસ્ત્વયિ ભાતિ સર્વં
    અનેકરૂપં પરમન્ત્રમેકમ્ ।
પિનાકપાણિં ભયનાશહેતું
    ચિદમ્બરેશં હૃદિ ભાવયામિ ॥ ૭॥

કૃપાસમુદ્રં સુમુખં ત્રિનેત્રં
    જટાધરં પાર્વતિવામભાગમ્ ।
સદાશિવં રુદ્રમનન્તરૂપં
    ચિદમ્બરેશં હૃદિ ભાવયામિ ॥ ૮॥

॥ ઇતિ શ્રીચિદમ્બરેશસ્તુતિઃ સમ્પૂર્ણા ॥

Proofread by Aruna Narayanan

*Shri Chidambaresha Stuti*

pdf was typeset on July 25, 2021

Please send corrections to *sanskrit@cheerful.com*